श्री विष्णुसहस्रनाम

श्री गुरुभ्यॊ नमः । हरिः ऒं ।

विष्णुसहस्रनाम पीटिके (१३ स्लॊक)

वैशंपायन उवाच

श्रुत्वा धर्मानशॆषॆण पावनानि च सर्वशः ।
युधिष्ठिरः शांतनवं पुनरॆवाभ्यभ्याषत ॥ १ ॥

युधिष्ठिर:

किमॆकं दैवतं लॊकॆ किं वाप्यॆकं परायणं ।
स्तुवंतः कं कमर्चंतः प्राप्नुयुर्मानवाः शुभम ॥ २ ॥
कॊ धर्मः सर्वधर्माणां भवतः परमॊ मतः ।
किं जपन्मुच्यतॆ जंतुर्जन्मसंसारबंधनात ॥ ३ ॥

भीष्म:

जगत्प्रभुं दॆवदॆवमनंतं पुरुषॊत्तमम ।
स्तुवन्नामसहस्रॆण पुरुषः सततॊत्थितः ॥ ४ ॥
तमॆव चार्चयन्नित्यं भक्त्या पुरुषमव्ययम ।
ध्यायन स्तुवन्नमस्यंश्च यजमानस्तमॆव च ॥ ५ ॥
अनादि निधनं विष्णुं सर्वलॊकमहॆश्वरम ।
लॊकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगॊ भवॆत ॥ ६ ॥
ब्रह्मण्यं सर्वधर्मज्ञं लॊकानां कीर्तिवर्धनम ।
लॊकनाथं महद्भूतं सर्वभूतभवॊध्भवम ॥ ७ ॥
ऎष मॆ सर्वधर्माणां धर्मॊधिकतमॊ मतः

www.yousigma.com

यद्भक्त्या पुंडरीकाक्षं स्तवैरर्चेन्नरः सदा ॥ ८ ॥
परमं यो महत्तेजः परमं यो महत्तपः ।
परमं यो महद्ब्रह्म परमं यः परायणम ॥ ९ ॥
पवित्राणां पवित्रं यो मंगलानां च मंगलम ।
दैवतं देवतानां च भूतानां योव्ययः पिता ॥ १० ॥
यतः सर्वाणि भूतानि भवंत्यादियुगागमे ।
यस्मिंश्च प्रलयं यांति पुनरेव युगक्षये ॥ ११ ॥
तस्य लोकप्रधानस्य जगन्नाथस्य भूपते ।
विष्णोर्नामसहस्रं मे श्रुणु पापभयापहम ॥ १२ ॥
यानि नामानि गौणानि विख्यातानि महात्मनः ।
ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये ॥ १३ ॥
वक्रतुंड महाकाय कोटि सूर्य समप्रभ
निर्विघ्नं कुरु मे देव सर्व कार्येषु सर्वद
शुक्लांबरदरं विष्णुं शशिवर्णं चतुर्भुजं
प्रसन्न वदनं ध्यायेत सर्व विघ्नोप शांतये

विष्णुसहस्रनाम (११७ स्लोक)

(१) विश्वं (२) विष्णु: (३) वशत्कार: (४) भूत भव्य भवत प्रभु:
(५) भूतकृत (६) भूतभ्रुत (७) भाव: (८) भूतात्म (९) भूतभावन: ॥ १४ ॥
(१०) पूतात्मा (११) परमात्म (१२) मुक्तानां परमा गति:

(१३) अव्यय: (१४) पुरुष: (१५) साक्षि (१६) क्षेत्रज्ञ: (१७) अक्षर: ऐव छ ॥ १५

(१८) योग: (१९) योग विदां नेता (२०) प्रधान पुरुषीश्वर

(२१) नारसिंहवपु: (२२) श्रीमान (२३) केशव: (२४) पुरुषोत्तम: ॥ १६ ॥

(२५) सर्व: (२६) शर्व: (२७) शिव: (२८) स्थणु: (२९) भूतादि: (३०) निधिरव्यय:

(३१) संभव: (३२) भावन: (३३) भर्ता (३४) प्रभव: (३५) प्रभु: (३६) ईश्वर: ॥ १७ ॥

(३७) स्वयंभू: (३८) शंभु: (३९) आदित्य: (४०) पुष्कराक्ष: (४१) महास्वन:

(४२) अनादिनिधन: (४३) धाता (४४) विधाता (४५) धातुरुथामः ॥ १८ ॥

(४६) अप्रमेय: (४७) हृषिकेश: (४८) पद्मनाभ: (४९) अमरप्रभु:

(५०) विश्वकर्म (५१) मनु: (५२) त्वष्टा (५३) स्थविष्ट (५४) स्थविरो ध्रुव: ॥ १९ ॥

(५५) आग्राह्य: (५६) शाश्वत: (५७) कृष्ण: (५८) लोहिताक्ष: (५९) प्रतर्धन:

(६०) प्रभूत: (६१) त्रिककुभ्धम (६२) पवित्रं (६३) मंगळं परम ॥ २० ॥

(६४) ईशान (६५) प्राणद: (६६) प्राण: (६७) ज्येष्ठ: (६८) श्रेष्ट: (६९)

www.yousigma.com

प्रजापति:

(७०) हिरण्यगर्भ: (७१) भूगर्भ: (७२) माधव (७३) मधुसूदन: ॥ २१ ॥

(७४) ईश्वर: (७५) विक्रमी (७६) धन्वी (७७) मॆधावी (७८) विक्रम: (७९) क्रम:

(८०) अनुथम (८१) दुराधर्ष: (८२) कृतज्ञ: (८३) कृति: (८४) आत्मवान ॥ २२ ॥

(८५) सुरॆश: (८६) शरणम (८७) शर्म (८८) विश्वरॆता (८९) प्रजाभव: (९०) अह: (९१) संवत्सर: (९२) व्याल: (९३) प्रत्यय: (९४) सर्वदर्शन: ॥ २३ ॥

(९५) आज: (९६) सर्वॆश्वर: (९७) सिद्ध: (९८) सिद्धि: (९९) सर्वादि: (१००) अच्युत:

(१०१) वृषाकपि: (१०२) आमॆयात्मा (१०३) सर्वयॊगविनिसृत: ॥ २४ ॥

(१०४) वसु: (१०५) वसुमना: (१०६) सत्य: (१०७) समात्मा (१०८) संमित (असंमित) (१०९) सम:

(११०) अमॊघ: (१११) पुंडरीकाक्ष: (११२) वृषकर्मा (११३) वृषाकृतिः ॥ २५ ॥

(११४) रुध्र: (११५) बहुशिरा: (११६) भभु: (११७) विश्वयॊनि: (११८) सुचिश्रवा:

(११९) अमृत: (१२०) शाश्वतस्थणु: (१२१) वरारॊह: (१२२) महातपा: ॥ २६ ॥

(१२३) सर्वग: (१२४) सर्वविद्बनु: (१२५) विश्वक्सॆन: (१२६) जनार्दन:
(१२७) वॆद: (१२८) वॆदवित (१२९) अव्यंग: (१३०) वॆदांग: (१३१) वॆदवित (१३२) कवि: ॥ २७ ॥
(१३३) लॊकाध्यक्ष: (१३४) सुराद्यक्ष: (१३५) धर्माद्यक्ष: (१३६) कृताकृत:
(१३७) चतुरात्मा (१३८) चतुर्व्युह: (१३९) चतुदंष्ट्र (१४०) चतुर्भुज: ॥ २८ ॥
(१४१) ब्राजिष्णु: (१४२) भॊजनं (१४३) भॊक्ता (१४४) सहिष्णु: (१४५) जगदादिज:
(१४६) अनघः (१४७) विजयः (१४८) जॆता (१४९) विश्वयॊनिः (१५०) पुनर्वसुः ॥ २९ ॥
(१५१) उपॆंद्र (१५२) वामनः (१५३) प्रांशुः (१५४) अमॊघः (१५५) शुचिः (१५६) ऊर्जितः
(१५७) अतींद्रः (१५८) संग्रहः (१५९) सर्गः (१६०) धृतात्मा (१६१) नियमः (१६२) यमः ॥ ३० ॥
(१६३) वॆध्यः (१६४) वैद्यः (१६५) सदायॊगी: (१६६) वीरहा (१६७) माधवः (१६८) मधुः
(१६९) अतींद्रियः (१७०) महामायः (१७१) महॊत्साहः (१७२) महाबलः ॥ ३१ ॥
(१७३) महाबुद्धिः (१७४) महावीर्यः (१७५) महाशक्तिः (१७६) महाद्युतिः

www.yousigma.com

(१७७) अनिर्देश्यवपुः (१७८) श्रीमान (१७९) अमेयात्मा (१८०) महाद्रिधृक ॥ ३२ ॥

(१८१) महेष्वासः (१८२) महीभर्ता (१८३) श्रीनिवासः (१८४) सतांगतिः (१८५) अनिरुद्धः (१८६) सुरानंदः (१८७) गोविंदः (१८८) गोविदांपतिः ॥ ३३ ॥

(१८९) मरीचिः (१९०) दमनः (१९१) हंसः (१९२) सुपर्णः (१९३) भुजगोत्तमः

(१९४) हिरण्यनाभः (१९५) सुतपाः (१९६) पद्मनाभः (१९७) प्रजापतिः ॥ ३४ ॥

(१९८) अमृत्युः (१९९) सर्वदृक (२००) सिंहः (२०१) संधाता (२०२) संधिमान (२०३) स्थिरः

(२०४) अजः (२०५) दुर्मर्षणः (२०६) शास्ता (२०७) विश्रुतात्मा (२०८) सुरारिहा ॥ ३५ ॥

(२०९) गुरुः (२१०) गुरुतमः (२११) धामः (२१२) सत्यः (२१३) सत्यपराक्रमः

(२१४) निमिषः (२१५) अनिमिषः (२१६) स्रग्वी (२१७) वाचस्पतिः (२१८) उदारधीः ॥ ३६ ॥

(२१९) अग्रणीः (२२०) ग्रामणीः (२२१) श्रीमान (२२२) न्यायः (२२३) नेता (२२४) समीरणः

(२२५) सहस्रमूर्धा (२२६) विश्वात्मा (२२७) सहस्राक्षः (२२८) सहस्रपात ॥ ३७ ॥

www.yousigma.com

(२२९) आवर्तनः (२३०) (अ)निवृत्तात्मा (२३१) संवृतः (२३२) संप्रमर्दनः

(२३३) अहःसंवर्तकः (२३४) वह्नि (२३५) अनिलः (२३६) धरणीधरः ॥ ३८ ॥

(२३७) सुप्रसादः (२३८) प्रसन्नात्मा (२३९) विश्वधृक (२४०) विश्वभुक (२४१) विभुः

(२४२) सत्कर्ता (२४३) सत्कृतः (२४४) साधुः (२४५) जह्नु (२४६) नारायणः (२४७) नरः ॥ ३९ ॥

(२४८) असंख्येयः (२४९) अप्रमेयात्मा (२५०) विशिष्टः (२५१) शिष्टकृत (२५२) शिशुचिः

(२५३) सिद्धार्थः (२५४) सिद्धसंकल्पः (२५५) सिद्धिदः (२५६) सिद्धिसाधनः ॥ ४० ॥

(२५७) वृषाही (२५८) वृषभः (२५९) विष्णुः (२६०) वृशपर्वा (२६१) वृषोदरः

(२६२) वर्धनः (२६३) वर्धमानः (२६४) विविक्तः (२६५) श्रुतिसागरः ॥ ४१ ॥

(२६६) सुभुजः (२६७) दुर्धरः (२६८) वाग्मी (२६९) महेंद्रः (२७०) वसुदः (२७१) वसुः

(२७२) नैकरूपः (२७३) बृहद्रूपः (२७४) शिपिविष्टः (२७५) प्रकाशनः ॥ ४२ ॥

(२७६) ओजस्तेजोद्युतिधरः (२७७) प्रकाशात्मा (२७८) प्रतापनः

www.yousigma.com

(२७९) ऋद्धः (२८०) स्पष्टाक्षरो मंत्रः (स्पष्टाक्षरः+मंत्रः) (२८१) चंद्रांशुः (२८२) भास्करद्युतिः ॥ ४३ ॥

(२८३) अमृतांशूद्भवः (२८४) भानुः (२८५) शशबिंदुः (२८६) सुरेश्वरः (२८७) औषधं (२८८) जगतः सेतुः (२८९) सत्यधर्मपराक्रमः ॥ ४४ ॥

(२९०) भूतभव्यभवन्नाथः (२९१) पवनः (२९२) पावनः (२९३) अनलः (२९४) कामहा (२९५) कामकृत (२९६) कांतः (२९७) कामः (२९८) कामप्रदः (२९९) प्रभुः ॥ ४५ ॥

(३००) युगादिकृत (३०१) युगावर्तः (३०२) नैकमायः (३०३) महाशनः (३०४) अदृश्यः (३०५) व्यक्तरूपः (अव्यक्तरूपः) (३०६) सहस्रजित (३०७) अनंतजित ॥ ४६ ॥

(३०८) इष्टः (३०९) अविशिष्टः (विशिष्टः) (३१०) शिष्टेष्टः (३११) शिखंडी (३१२) नहुषः (३१३) वृषः

(३१४) क्रोधहा (३१५) क्रोधकृत (३१६) कर्ता (३१७) विश्वबाहुः (३१८) महीधरः ॥ ४७ ॥

(३१९) अच्युतः (३२०) प्रथितः (३२१) प्राणः (३२२) प्राणदः (३२३) वासवानुजः

(३२४) अपांनिधिः (३२५) अधिष्टानम (३२६) अप्रमत्तः (३२७) प्रतिष्ठितः ॥ ४८ ॥

(३२८) स्कंदः (३२९) स्कंदधरः (३३०) धुर्यः (३३१) वरदः (३३२) वायुवाहनः

(३३३) वासुदेवः (३३४) बृहद्भानुः (३३५) आदिदेवः (३३६) पुरंदरः ॥

४९ ॥

(३३७) अशोकः (३३८) तारणः (३३९) तारः (३४०) शूरः (३४१) शौरिः (३४२) जनेश्वरः

(३४३) अनुकूलः (३४४) शतावर्तः (३४५) पद्मी (३४६) पद्मनिभेक्षणः ॥ ५० ॥

(३४७) पद्मनाभः (३४८) अरविंदाक्षः (३४९) पद्मगर्भः (३५०) शरीरभृत (३५१) महर्द्धिः (३५२) ऋद्धः (३५३) वृद्धात्मा (३५४) महाक्षः (३५५) गरुडद्वजः ॥ ५१ ॥

(३५६) अतुलः (३५७) शरभः (३५८) भीमः (अभीमः) (३५९) समयज्ञः (३६०) हविर्हरिः

(३६१) सर्वलक्षणलक्षण्यः (३६२) लक्ष्मीवान (३६३) समितिंजयः ॥ ५२ ॥

(३६४) विक्षरः (३६५) रोहितः (३६६) मार्गः (३६७) हेतुः (३६८) दामोदरः (३६९) सहः

(३७०) महीधरः (३७१) महाभागः (३७२) वेगवान (३७३) अमिताशनः ॥ ५३ ॥

(३७४) उद्भवः (३७५) क्षोभणः (३७६) देवः (३७७) श्रीगर्भः (३७८) परमेश्वरः

(३७९) करणं (३८०) कारणं (३८१) कर्ता (३८२) विकर्ता (३८३) गहनः (३८४) गुहः ॥ ५४ ॥

(३८५) व्यवसायः (३८६) व्यवस्थानः (३८७) संस्थानः (३८८) स्थानदः

(३८९) ध्रुवः
(३९०) परर्द्धिः (३९१) परमस्पष्टः (३९२) स्तुष्टः (३९३) पुष्टः (३९४) शुभेॊक्षणः ॥ ५५ ॥
(३९५) रामः (३९६) विरामः (३९७) विरजः (३९८) मार्गः (३९९) नेॊयः (४००) नयः (४०१) अनयः
(४०२) वीरः (४०३) शक्तिमतां श्रेॊष्ठः (४०४) धर्मः (४०५) धर्मविदुत्तमः ॥ ५६ ॥
(४०६) वैकुंठः (४०७) पुरुषः (४०८) प्राणः (४०९) प्राणदः (४१०) प्रणवः (४११) पृथुः
(४१२) हिरण्यगर्भः (४१३) शत्रुघ्नः (४१४) व्याप्तः (४१५) वायुः (४१६) अधोॊक्षजः ॥ ५७ ॥
(४१७) ऋतुः (४१८) सुदर्शनः (४१९) कालः (४२०) परमेॊष्ठी (४२१) परिग्रहः
(४२२) उग्रः (४२३) संवस्सरः (४२४) दक्षः (४२५) विश्रामः (४२६) विश्वदक्षिणः ॥ ५८ ॥
(४२७) विस्तारः (४२८) स्थावरः (४२९) स्थाणुः (४३०) प्रमाणम (४३१) बीजमव्ययम
(४३२) अर्थः (४३३) अनर्थः (४३४) महाकोशः (४३५) महाभॊगः (४३६) महाधनः ॥ ५९ ॥
(४३७) अनिर्विण्णः (४३८) स्थविष्ठः (४३९) भूः (अभूः) (४४०) धर्मयूपः (४४१) महामखः

www.yousigma.com

(४४२) नक्षत्रनेमिः (४४३) नक्षत्री (४४४) क्षमः (४४५) क्षामः (४४६) समीहनः ॥ ६० ॥
(४४७) यज्ञः (४४८) इज्यः (४४९) महेज्यः (४५०) क्रतुः (४५१) सत्रम (४५२) सतांगतिः
(४५३) सर्वदर्शी (४५४) विमुक्तात्मा (४५५) सर्वज्ञः (४५६) ज्ञानमुत्तमम ॥ ६१ ॥
(४५७) सुव्रतः (४५८) सुमुखः (४५९) सूक्ष्मः (४६०) सुघोषः (४६१) सुखदः (४६२) सुहृत
(४६३) मनोहरः (४६४) जितक्रोधः (४६५) वीरबाहुः (४६६) विदारणः ॥ ६२ ॥
(४६७) स्वापनः (४६८) स्ववशः (४६९) व्यापी (४७०) नैकात्मा (४७१) नैककर्मकृत
(४७२) वत्सरः (४७३) वत्सलः (४७४) वत्सी (४७५) रत्नगर्भः (४७६) धनेश्वरः ॥ ६३ ॥
(४७७) धर्मगुप (४७८) धर्मकृत (४७९) धर्मी (४८०) सत (४८१) असत (४८२) क्षरम (४८३) अक्षरम
(४८४) अविज्ञाता (४८५) सहस्रांशुः (४८६) विधाता (४८७) कृतलक्षणः ॥ ६४ ॥
(४८८) गभस्तिनेमिः (४८९) सत्वस्थः (४९०) सिंहः (४९१) भूतमहेश्वरः
(४९२) आदिदेवः (४९३) महादेवः (४९४) देवेशः (४९५) देवभृद्गुरुः ॥

६५ ॥

(४९६) उत्तरः (४९७) गोपतिः (४९८) गोप्ता (४९९) ज्ञानगम्यः (५००) पुरातनः

(५०१) शरीरभूतभृत (५०२) भोक्ता (५०३) कपींद्रः (५०४) भूरिदक्षिणः ॥ ६६ ॥

(५०५) सोमपः (५०६) अमृतपः (५०७) सोमः (५०८) पुरुजित (५०९) पुरुसत्तमः

(५१०) विनयः (५११) जयः (५१२) सत्यसंधः (५१३) दाशार्हः (५१४) सात्वतांपतिः ॥ ६७ ॥

(५१५) जीवः (५१६) विनयितासाक्षी (५१७) मुकुंदः (५१८) अमितविक्रमः

(५१९) अंभोनिधिः (५२०) अनंतात्मा (५२१) महोदधिशयः (५२२) अंतकः ॥ ६८ ॥

(५२३) अजः (५२४) महार्हः (५२५) स्वाभाव्यः (५२६) जितामित्रः (५२७) प्रमोदनः

(५२८) आनंदः (५२९) नंदनः (५३०) नंदः (५३१) सत्यधर्मा (५३२) त्रिविक्रमः ॥ ६९ ॥

(५३३) महर्षिः (५३४) कपिलाचार्यः (५३५) कृतज्ञः (५३६) मेदिनीपतिः (५३७) त्रिपदः (५३८) त्रिदशाध्यक्षः (५३९) महाशृंगः (५४०) कृतांतकृत ॥ ७० ॥

(५४१) महावराहः (५४२) गोविंदः (५४३) सुषेणः (५४४) कनकांगदी

(५४५) गुहृयः (५४६) गभीरः (५४७) गहनः (५४८) गुप्तः (५४९) चक्रगदाधरः ॥ ७१ ॥

(५५०) वॆधाः (५५१) स्वांगः (५५२) अजितः (५५३) कृष्णः (५५४) दृडः (५५५) संकर्षणः (५५६) अच्युतः

(५५७) वरुणः (५५८) वारुणः (५५९) वृक्षः (५६०) पुष्कराक्षः (५६१) महामनाः ॥ ७२ ॥

(५६२) भगवान (५६३) भगहा (५६४) आनंदी (५६५) वनमाली (५६६) हलायुधः

(५६७) आदित्यः (५६८) ज्यॊतिरादित्यः (५६९) सहिष्णुः (५७०) गतिसत्तमः ॥ ७३ ॥

(५७१) सुधन्वा (५७२) खंडपरशुः (५७३) दारुणः (५७४) द्रविणप्रदः (५७५) दिवस्पृक (५७६) सर्वदृग व्यासः (५७७) वाचस्पतिः (५७८) अयॊनिजः ॥ ७४ ॥

(५७९) त्रिसामा (५८०) सामगः (५८१) साम (५८२) निर्बाणं (५८३) भॆषजम (५८४) भिषक

(५८५) संन्यासकृत (५८६) शमः (५८७) शांतः (५८८) निष्ठा (५८९) शांतिः (५९०) परायणम ॥ ७५ ॥

(५९१) शुभांगः (५९२) शांतिदः (५९३) स्रष्टा (५९४) कुमुदः (५९५) कुवलॆशयः

(५९६) गॊहितः (५९७) गॊपतिः (५९८) गॊप्ता (५९९) वृषभाक्षः (६००) वृषप्रियः ॥ ७६ ॥

(६०१) अनिवर्ती (६०२) निवृत्तात्मा (६०३) संक्षेप्ता (६०४)
क्षेमकृच्छिवः
(६०५) श्रीवत्सवक्षाः (६०६) श्रीवासः (६०७) श्रीपतिः (६०८)
श्रीमतांवरः ॥ ७७ ॥
(६०९) श्रीदः (६१०) श्रीशः (६११) श्रीनिवासः (६१२) श्रीनिधिः (६१३)
श्रीविभावनः
(६१४) श्रीधरः (६१५) श्रीकरः (६१६) श्रेयः (६१७) श्रीमान (६१८)
लोकत्रयाश्रयः ॥ ७८ ॥
(६१९) स्वक्षः (६२०) स्वंगः (६२१) शतानंदः (६२२) नंदिः (६२३)
ज्योतिर्गणेश्वरः
(६२४) विजितात्मा (६२५) अविधेयात्मा (विधेयात्मा) (६२६)
सत्कीर्तिः (६२७) छिन्नसंशयः ॥ ७९ ॥
(६२८) उदीर्णः (६२९) सर्वतश्चक्षुः (६३०) अनीशः (६३१)
शाश्वतस्थिरः
(६३२) भूशयः (६३३) भूषणः (६३४) भूतिः (६३५) विशोकः (६३६)
शोकनाशनः ॥ ८० ॥
(६३७) अर्चिष्मान (६३८) अर्चितः (६३९) कुंभः (६४०) विशुद्धात्मा
(६४१) विशोधनः
(६४२) अनिरुद्धः (६४३) अप्रतिरथः (६४४) प्रद्युम्नः (६४५)
अमितविक्रमः ॥ ८१ ॥
(६४६) कालनेमिनिहा (६४७) वीरः (६४८) शौरिः (६४९) शूरजनेश्वरः

www.yousigma.com

(६५०) त्रिलोकात्मा (६५१) त्रिलोकेशः (६५२) केशवः (६५३) केशिहा (६५४) हरिः ॥ ८२ ॥

(६५५) कामदेवः (६५६) कामपालः (६५७) कामी (६५८) कांतः (६५९) कृतागमः

(६६०) अनिर्देश्यवपु (६६१) विष्णुः (६६२) वीरः (६६३) अनंतः (६६४) धनंजयः ॥ ८३ ॥

(६६५) ब्रह्मण्यः (६६६) ब्रह्मकृत (६६७) ब्रह्मा (६६८) ब्रह्म (६६९) ब्रह्मविवर्धनः

(६७०) ब्रह्मवित (६७१) ब्राह्मणः (६७२) ब्रह्मी (६७३) ब्रह्मज्ञः (६७४) ब्राह्मणप्रियः ॥ ८४ ॥

(६७५) महाक्रमः (६७६) महाकर्मा (६७७) महातेजाः (६७८) महोरगः (६७९) महाक्रतुः (६८०) महायज्वा (६८१) महायज्ञ (६८२) महाहविः ॥ ८५ ॥

(६८३) स्तव्यः (६८४) स्तवप्रियः (६८५) स्तोत्रम (६८६) स्तुतिः (६८७) स्तोता (६८८) रणप्रियः

(६८९) पूर्णः (६९०) पूरयिता (६९१) पुण्यः (६९२) पुण्यकीर्तिः (६९३) अनामयः ॥ ८६ ॥

(६९४) मनोजवः (६९५) तीर्थकरः (६९६) वसुरेताः (६९७) वसुप्रदः (६९८) वसुप्रदः (६९९) वासुदेवः (७००) वसुः (७०१) वसुमनाः (७०२) हविः ॥ ८७ ॥

(७०३) सद्गतिः (७०४) सत्कृतिः (७०५) सत्ता (७०६) सद्भूतिः (७०७)

www.yousigma.com

सत्परायणः

(७०८) शूरसॆन (७०९) यदुश्रॆष्ठः (७१०) सन्निवासः (७११) सुयामुनः ॥ ८८ ॥

(७१२) भूतावासः (७१३) वासुदॆवः (७१४) सर्वासुनिलयः (७१५) अनलः (७१६) दर्पहा (७१७) दर्पदः (७१८) दृप्तः (७१९) दुर्धरः (७२०) अपराजितः ॥ ८९ ॥

(७२१) विश्वमूर्तिः (७२२) महामूर्तिः (७२३) दीप्तमूर्तिः (७२४) अमूर्तिमान

(७२५) अनॆकमूर्तिः (७२६) अव्यक्तः (७२७) शतमूर्तिः (७२८) शताननः ॥ ९० ॥

(७२९) ऎकः (७३०) नैकः (७३१) सवः (७३२) कः (७३३) किम (७३४) यत (७३५) तत (७३६) पदमनुत्तमम (पदम+अनुत्तमम)

(७३७) लॊकबंधुः (७३८) लॊकनाथः (७३९) माधवः (७४०) भक्तवत्सलः ॥ ९१ ॥

(७४१) सुवर्णवर्णः (७४२) हॆमांगः (७४३) वरांगः (७४४) चंदनांगदी

(७४५) वीरहा (७४६) विषमः (अविषमः) (७४७) शून्यः (७४८) घृताशीः

(७४९) अचलः (७५०) चलः ॥ ९२ ॥

(७५१) अमानी (७५२) मानदः (७५३) मान्यः (७५४) लॊकस्वामी

(७५५) त्रिलॊकधृक

(७५६) सुमॆधाः (७५७) मॆधजः (७५८) धन्यः (७५९) सत्यमॆधाः (७६०) धराधरः ॥ ९३ ॥

(७६१) तॊजॊवृषः (७६२) द्युतिधरः (७६३) सर्वशस्त्रभृतांवरः

(७६४) प्रग्रहः (७६५) निग्रहः (७६६) व्यग्रः (७६७) नैकशृंगः (७६८) गदाग्रजः ॥ ९४ ॥

(७६९) चतुर्मूर्तिः (७७०) चतुर्बाहुः (७७१) चतुर्व्यूहः (७७२) चतुर्गतिः

(७७३) चतुरात्मा (७७४) चतुर्भावः (७७५) चतुर्वेदः (७७६) ऎकपात ॥ ९५ ॥

(७७७) समावर्तः (७७८) अनिवृत्तात्मा(निवृत्तात्मा) (७७९) दुर्जयः

(७८०) दुरतिक्रमः

(७८१) दुर्लभः (७८२) दुर्गमः (७८३) दुर्गः (७८४) दुरावासः (७८५) दुरारिहा ॥ ९६ ॥

(७८६) शुभांगः (७८७) लॊकसारंगः (७८८) सुतंतुः (७८९) तंतुवर्धनः

(७९०) इंद्रकर्मा (७९१) महाकर्मा (७९२) कृतकर्मा (७९३) कृतागमः ॥ ९७ ॥

(७९४) उद्भवः (७९५) सुंदरः (७९६) सुंदः (७९७) रत्ननाभः (७९८) सुलॊचनः

(७९९) अर्कः (८००) वाजसनः (८०१) शृंगी (८०२) जयंतः (८०३) सर्वविज्जयी ॥ ९८ ॥

(८०४) सुवर्णबिंदु (८०५) अक्षॊभ्यः (८०६) सर्ववागीश्वरॆश्वरः

(८०७) महाह्रदः (८०८) महागर्तः (८०९) महाभूतः (८१०) महानिधिः ॥ ९९ ॥

(८११) कुमुदः (८१२) कुंदरः (८१३) कुंदः (८१४) पर्जन्यः (८१५)

पावनः (८१६) अनिलः
(८१७) अमृताशः (८१८) अमृतवपुः (८१९) सर्वज्ञः (८२०) सर्वतोमुखः ॥ १०० ॥
(८२१) सुलभः (८२२) सुव्रतः (८२३) सिद्धः (८२४) शत्रुजित (८२५) शत्रुतापनः
(८२६) न्यग्रोधः (८२७) उदुंबरः (८२८) अश्वत्थः (८२९) चाणूरांध्रनिसूदनः ॥ १०१ ॥
(८३०) सहस्रार्चिः (८३१) सप्तजिह्वः (८३२) सप्तैधाः (८३३) सप्तवाहनः
(८३४) अमूर्तिः (८३५) अनघः (८३६) अचिंत्यः (८३७) भयकृत (८३८) भयनाशनः ॥ १०२ ॥
(८३९) अणुः (८४०) बृहत (८४१) कृशः (८४२) स्थूलः (८४३) गुणभृत (८४४) निर्गुणः (८४५) महान
(८४६) अधृतः (८४७) स्वधृतः (८४८) स्वास्यः (८४९) प्राग्वंशः (८५०) वंशवर्धनः ॥ १०३ ॥
(८५१) भारभृत (८५२) कथितः (८५३) योगी (८५४) योगीशः (८५५) सर्वकामदः
(८५६) आश्रमः (८५७) श्रमणः (८५८) क्षामः (८५९) सुपर्णः (८६०) वायुवाहनः ॥ १०४ ॥
(८६१) धनुर्धरः (८६२) धनुर्वेदः (८६३) दंडः (८६४) दमयिता (८६५) दमः

(८६६) अपराजितः (८६७) सर्वसहः (८६८) नियंता (८६९) नियमः(अनियमः) (८७०) यमः(अयमः) ॥ १०५ ॥

(८७१) सत्ववान (८७२) सात्विकः (८७३) सत्यः (८७४) सत्यधर्मपरायणः

(८७५) अभिप्रायः (८७६) प्रियार्हः (८७७) अर्हप्रियकृत (८७८) प्रीतिवर्धनः ॥ १०६ ॥

(८७९) विहायसगतिः (८८०) ज्यौतिः (८८१) सुरुचिः (८८२) हुतभुग्विभुः

(८८३) रविः (८८४) विरौचनः (८८५) सूर्यः (८८६) सविता (८८७) रविलौचनः ॥ १०७ ॥

(८८८) अनंतः (८८९) हुतभुग्भौक्ता (८९०) सुखदः (८९१) नैकजः (८९२) अग्रजः

(८९३) अनिर्विण्णः (८९४) सदामर्षी (८९५) लौकाधिष्ठानम (८९६) अद्भुतः ॥ १०८ ॥

(८९७) सनात (८९८) सनातनतमः (८९९) कपिलः (९००) कपिः (९०१) अप्ययः

(९०२) स्वस्तिदः (९०३) स्वस्तिकृत (९०४) स्वस्ति (९०५) स्वस्तिभुक (९०६) स्वस्तिदक्षिणः ॥ १०९ ॥

(९०७) अरौद्रः (९०८) कुंडली (९०९) चक्री (९१०) विक्रमी (९११) ऊर्जितशासनः

(९१२) शब्दातिगः (९१३) शब्दसहः (९१४) शिशिरः (९१५) शर्वरीकरः

॥ ११० ॥

(९१६) अक्रूरः (९१७) पेशलः (९१८) दक्षः (९१९) दक्षिणः (९२०) क्षमिणांवरः

(९२१) विद्वत्तमः (९२२) वीतभयः (९२३) पुण्यश्रवणकीर्तनः ॥ १११ ॥

(९२४) उत्तारणः (९२५) दुष्कृतिहा (९२६) पुण्यः (९२७) दुःस्वप्ननाशनः

(९२८) वीरहा (९२९) रक्षणः (९३०) संतः (९३१) जीवनः (९३२) पर्यवस्थितः ॥ ११२ ॥

(९३३) अनंतरूपः (९३४) अनंतश्रीः (९३५) जितमन्युः (९३६) भयापहः

(९३७) चतुरश्रः (९३८) गभीरात्मा (९३९) विदिशः (९४०) व्यादिशः

(९४१) दिशः ॥ ११३ ॥

(९४२) अनादिः (९४३) भूर्भुवॊ लक्ष्मीः (९४४) सवीरः (९४५) रुचिरांगदः

(९४६) जननः (९४७) जनजन्मादिः (९४८) भीमः (९४९) भीमपराक्रमः ॥ ११४ ॥

(९५०) आधारनिलयः (९५१) धाता (अधाता) (९५२) पुष्पहासः (९५३) प्रजागरः

(९५४) ऊर्ध्वगः (९५५) सत्पथाचारः (९५६) प्राणदः (९५७) प्रणवः

(९५८) पणः ॥ ११५ ॥

(९५९) प्रमाणम (९६०) प्राणनिलयः (९६१) प्राणभृत (९६२)

www.yousigma.com

प्राणजीवनः

(९६३) तत्वम (९६४) तत्ववित (९६५) एकात्मा (९६६) जन्ममृत्युजरातिगः ॥ ११६ ॥

(९६७) भूर्भुवःस्वस्तरुः (९६८) तारः (९६९) सविता (९७०) प्रपितामहः (९७१) यज्ञः (९७२) यज्ञपतिः (९७३) यज्वा (९७४) यज्ञांगः (९७५) यज्ञवाहनः ॥ ११७ ॥

(९७६) यज्ञभृत (९७७) यज्ञकृत (९७८) यज्ञी (९७९) यज्ञभुक (९८०) यज्ञसाधनः

(९८१) यज्ञांतकृत (९८२) यज्ञगुह्यम (९८३) अन्नम (९८४) अन्नाद ऐव छ ॥ ११८ ॥

(९८५) आत्मयोनिः (९८६) स्वयंजातः (९८७) वैखानः (९८८) सामगायनः

(९८९) देवकीनंदनः (९९०) स्रष्टा (९९१) क्षितीशः (९९२) पापनाशनः ॥ ११९ ॥

(९९३) शंखभृत (९९४) नंदकी (९९५) चक्री (९९६) शार्ङ्गधन्वा (९९७) गदाधरः

(९९८) रथांगपाणिः (९९९) अक्षोभ्यः (१०००) सर्वप्रहरणायुधः ॥ १२० ॥

॥ सर्वप्रहरणायुधों नमः इति ॥

॥ सर्वप्रहरणायुधों नमः इति ॥

फलश्रुतिः (२२ स्लोक)

www.yousigma.com

इतीदं कीर्तनीयस्य कॆशवस्य महात्मनः ।
नाम्नां सहस्रं दिव्यानामशॆषॆण प्रकीर्तितम ॥ १२१ ॥
य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयॆत ।
नाशुभं प्राप्नुयात किंचित सॊमुत्रॆह च मानवः ॥ १२२ ॥
वॆदांतगॊ ब्राह्मणः स्यात क्षत्रियॊ विजयी भवॆत ।
वैश्यॊ धनसमृद्धः स्यात शूद्रस्सुखमवाप्नुयात ॥ १२३ ॥
धर्मार्थी प्राप्नुयाद्धर्मं अर्थार्थी चार्थमाप्नुयात ।
कामानवाप्नुयात कामी प्रजार्थी चाप्नुयात प्रजाम ॥ १२४ ॥
भक्तिमान यः सदॊत्थाय शुचिस्तद्‍गतमानसः ।
सहस्रं वासुदॆवस्य नाम्नामॆतत प्रकीर्तयॆत ॥ १२५ ॥
यशः प्राप्नॊति विपुलं याति प्राधान्यमॆव च ।
अचलां श्रियमाप्नॊति श्रॆयः प्राप्नॊत्यनुत्तमम ॥ १२६ ॥
न भयं क्वचिदाप्नॊति वीर्यं तॆजश्च विंदति ।
भवत्यरॊगॊ द्‍युतिमान बलरूपगुणान्वितः ॥ १२७ ॥
रॊगार्तॊ मुच्यतॆ रॊगाद्‍बद्धॊ मुच्यॆत बंधनात ।
भयान्मुच्यॆत भीतस्तु मुच्यॆतापन्न आपदः ॥ १२८ ॥
दुर्गाण्यतितरत्याशु पुरुषः पुरुषॊत्तमम ।
स्तुवन्नामसहस्रॆण नित्यं भक्तिसमन्वितः ॥ १२९ ॥
वासुदॆवाश्रयॊ मर्त्यॊ वासुदॆवपरायणः ।
सर्वपापविशुद्धात्मा याति ब्रह्म सनातनम ॥ १३० ॥
न वासुदॆवभक्तानामशुभं विद्‍यतॆ क्वचित ।

www.yousigma.com

जन्ममृत्युजराव्याधिभयं नैवॊपजायतॆ ॥ १३१ ॥
इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः ।
युज्यॆतात्मासुखक्षांतिश्रीधृतिस्मृतिकीर्तिभिः ॥ १३२ ॥
न क्रॊधॊ न च मात्सर्यं न लॊभॊ नाशुभा मतिः ।
भवंति कृतपुण्यानां भक्तानां पुरुषॊत्तमॆ ॥ १३३ ॥
द्यौस्सचंद्रार्कनक्षत्रा खं दिशॊ भूर्महॊदधिः ।
वासुदॆवस्य वीर्यॆण विधृतानि महात्मनः ॥ १३४ ॥
ससुरासुरगंधर्वं सयक्षॊरगराक्षसम ।
जगद्वशॆ वर्ततॆदं कृष्णस्य सचराचरम ॥ १३५ ॥
इंद्रियाणि मनॊ बुद्धिः सत्त्वं तॆजॊ बलं धृतिः ।
वासुदॆवात्मकान्याहुः, क्षॆत्रं क्षॆत्रज्ञ ऎव च ॥ १३६ ॥
सर्वागमानामाचारः प्रथमं परिकल्प्यतॆ ।
आचारप्रभवॊ धर्मॊ धर्मस्य प्रभुरच्युतः ॥ १३७ ॥
ऋषयः पितरॊ दॆवा महाभूतानि धातवः ।
जंगमाजंगमं चॆदं जगन्नारायणॊद्भवम ॥ १३८ ॥
यॊगॊ ज्ञानं तथा सांख्यं विद्याः शिल्पादिकर्म च ।
वॆदाश्शास्त्राणि विज्ञानमॆतत्सर्वं जनार्दनात ॥ १३९ ॥
ऎकॊ विष्णुर्महद्भूतं पृथग्भूतान्यनॆकशः ।
त्रीन?लॊकान्व्याप्य भूतात्मा भुंक्तॆ विश्वभुगव्ययः ॥ १४० ॥
इमं स्तवं भगवतॊ विष्णॊर्व्यासॆन कीर्तितम ।
पठॆद्य इच्छॆत्पुरुषः श्रॆयः प्राप्तुं सुखानि च ॥ १४१ ॥

www.yousigma.com

विश्वेश्वरमजं देवं जगतः प्रभवाप्ययम ।
भजंति ये पुष्कराक्षं न ते यांति पराभवम ॥ १४२ ॥
इति श्रीमन्महाभारते अनुशासनपर्वणि श्रीविष्णुसहस्रनाम स्तोत्रं संपूर्णम.
॥सर्वे जनाः सुखिनो भवंतु॥
॥ श्री कृष्णार्पण मस्तु॥
www.yousigma.com